# सांविदी

**प्रथम-पक्षः**

**केन्द्रीयसंस्कृतविश्वविद्यालयः,**

**नवदेहली**

**अथ च**

**द्वितीय-पक्षः**

**श्रीलालबहादुरशास्त्री-**

**राष्ट्रियसंस्कृतविश्भविद्यालयः, नवदेहली**

**अथ च**

**तृतीय-पक्षः**

**राष्ट्रियसंस्कृतविश्भविद्यालयः,तिरूपतिः**

**इत्येतेषां**

नवदेहलीस्थस्य केन्द्रीय-संस्कृत-विश्वविद्यालयस्यनवदेहलीस्थ-श्रीलालबहादुरशास्त्रीराष्ट्रियसंस्कृत-विश्वविद्यालयेन तथा तिरुपतिस्थराष्ट्रियसंस्कृतविश्वविद्यालयेन सह सांविदीयम्

R.K. Ramam 09.05.2022

Central Sanskrit University, Delhi
56-57, Institutional Area, Janakpuri, New Delhi-58
* Under MHRD, Govt. of India

09/05/2022

# सांविदीयं

## निर्मिता क्रियान्विताचास्ति।

**प्रथमपक्षः- केन्द्रीयसंस्कृतविश्वविद्यालयः, नवदेहली**

केन्द्रीय-संस्कृत-विश्वविद्यालयस्य(इतः परं के-सं-वि- इति नाम्ना सन्दर्भितस्य) स्थापनाआभारतं संस्कृतस्य प्रचाराय प्रसाराय च 2020 तमस्य वर्षस्य एप्रिल-मासस्य 30 दिनाङ्के जाता। अयं च विश्वविद्यालयः भारतसर्वकारेण पूर्णरूपेण वित्तीयानुदानितो विद्यते तथा संस्कृतस्य प्रचारप्रसारार्थं शीर्षनिकायत्वेन कार्यं करोति। संस्कृतशिक्षणस्य अनुसन्धानस्य च विकासः तथा प्रोत्साहनं च केन्द्रीयसंस्कृतविश्वविद्यालयस्य मुख्यम् उद्देश्यं विद्यते। एवमेव अयं विश्वविद्यालयः सम्बद्धानां सर्वेषां परिसराणाम् आदर्शसंस्कृतमहाविद्यालयानांशोधसंस्थानानाञ्च प्रबन्धनार्थं केन्द्रीयप्राशासनिकसमन्वयरूपेण कार्यं करोति। भारतसर्वकारद्वारा संस्कृतशिक्षाविकासाय स्वीकृतानां विभिन्नयोजनानां कार्यक्रमाणां च क्रियान्वयनमपि अयं विश्वविद्यालयः करोति।

संस्कृतभाषा सर्वासां भारतीयभाषाणां विकासाय तथा भारतीयसंस्कृतेः रक्षणाय च महत्त्वपूर्णांभूमिकां निर्वहति। संस्कृतभाषारक्षणं विना भारतीयभाषाणां विकासः भवितुं नार्हति। संस्कृतं ज्ञान-विज्ञानाभ्यां सैद्धान्तिकम् आधारं प्रददाति। भारतस्य समग्रविकासाय संस्कृतभाषायाः रक्षणं प्रचारश्च अवश्यं भवेत्। इदं दायित्वं निर्वहता भारतसर्वकारेण अस्य विश्वविद्यालस्य (पूर्वतनराष्ट्रियसंस्कृतसंस्थानस्य) स्थापनाय अनुशंसनं कृतम्। तदनुसारं 1970 तमे वर्षे सोसाईटि-पञ्जीकरणाधिनियमः 1860 इत्यस्य अनुगुणं पञ्जीकृतस्वायत्तसंघटनरूपेण समग्रे देशे विदेशे च संस्कृतस्य प्रचाराय प्रसाराय संरक्षणाय च राष्ट्रियसंस्कृत-संस्थानस्य स्थापनम् अभूत्। ततः उच्चमाध्यमिकशिक्षाविभागः,मानवसंसाधनविकासमन्त्रालयः,शास्त्रीभवनम्,नवदेहली अधिसूचनाक्रमाङ्कः-28/2000-यूदिनाङ्के07 मई 2002 इत्यस्य अनुगुणं विश्वविद्यालयानुदानायोगस्य अनुशंसनया राष्ट्रियसंस्कृतसंस्थानं मानितविश्वविद्यालयत्वेन उद्घोषितम्।

केन्द्रीयसंस्कृतविश्वविद्यालयः स्वोद्देश्यस्य प्राप्त्यर्थं सर्वकारस्य विभिन्नयोजनानां/कार्यक्रमाणां निष्पादनाय अधोलिखितगतिविधीन् सञ्चालयति।

यथा-

- विभिन्नराज्येषु परिसराणां स्थापना
- माध्यमिक-पूर्वस्नातक-स्नातक-स्नातकोत्तर-विद्यावारिधिस्तरेषु पारम्परिकपद्धत्या संस्कृतशिक्षणम्।
- स्नातक-(शिक्षाशास्त्री/बि.एड.)स्नातकोत्तर-(शिक्षाचार्यः/एम्.एड.)स्तरयोः संस्कृतशिक्षणप्रशिक्षणम्।
- संस्कृत-सम्बद्धानां विभिन्नविषयाणां शोधकार्यार्थं प्रोत्साहनम्।
- संस्कृतस्य प्रचाराय मानवसंसाधनविकासमन्त्रालयस्य योजनानां कार्यान्वयनम्।
- संस्कृतपुस्तकालयानां पाण्डुलिपिसंग्रहालयानां च स्थापना तथा दुर्लभपाण्डुलिपीनां महत्त्वपूर्णपुस्तकानां प्रकाशनम्।
- संस्कृताध्यायनार्थं पत्राचारपाठ्यक्रमस्य सञ्चालनम्।
- केन्द्रीय-संस्कृत-विश्वविद्यालयः एकः बहुपरिसरीयो विश्व-विशविद्यालयो वर्तते यस्य द्वादश परिसराः,शताधिकाः महाविद्यालयाः/शोधसंस्थानानि/आदर्शसंस्कृत-महाविद्यालयाः/ भारतवर्षे विभिन्नेषु स्थानेषु सञ्चालिता भवन्ति। संस्कृतस्य विकासाय विभिन्नयोजनानां परियोजनानां निर्माणाय क्रियान्वयनाय



Central Sanskrit University, Delhi
56-57, Institutional Area, Janakpuri, New Delhi-58
Under MHRD, Govt. of India

च केन्द्रीयसंस्कृतविश्वविद्यालयः मानवसंसाधनविकासमन्त्रालयस्य सहायताम् आचरति। एवमेव भारतशासनेन 1956 तमे वर्षे संघटितस्य संस्कृतायोगस्य संस्कृतविषयकानुशंसानां क्रियान्वयने अपि प्रमुखं दायित्वं निर्वहति।

तथा

**द्वितीयपक्षः- श्रीलालबहादुरशास्त्रीराष्ट्रियसंस्कृतविश्वविद्यालयः, नवदेहली**

अखिलभारतीयसंस्कृतसाहित्यसम्मेलनद्वारा नवदेहल्याम् ई.वी.1962तमे वर्षे अक्तूबरमासस्य अष्टमे दिनाङ्के विजयादशमीतिथौ संस्कृतविद्यापीठं संस्थापितम्। परस्तात् अखिलभारतीयसंस्कृतविद्यापीठमिति नाम्ना ततः पृथगेकं विद्यापीठं स्थापितं, यस्य संस्थापकोऽध्यक्षो दिवङ्गतः प्रधानमन्त्री श्रीलालबहादुरशास्त्री बभूव। शास्त्रिवर्यस्य परलोकगमनात् परमस्याध्यक्षतां स्वीकृतवती भूतपूर्वप्रधानमन्त्री श्रीमती इन्दिरागान्धी। ई .वी.1966 तमे वर्षे अक्तूबरमासस्य द्वितीयदिनाङ्के इदं श्रीलालबहादुरशास्त्री-राष्ट्रियसंस्कृतविद्यापीठमिति नाम्ना उदघोषयत् । ई .वी. 1967 तमे वर्षे अप्रैलमासस्य प्रथमे दिनाङ्के भारतसर्वकारेणाधिगृहीतमिदं दिसम्बरमासे एकविंशतिदिनाङ्के ई .वी.1970 तमे वर्षे श्रीलालबहादुरशास्त्री केन्द्रीयसंस्कृतविद्यापीठमिति प्रथितम्। विद्यापीठस्यास्य नाम्ना बहुलविकासमालक्ष्य भारतसर्वकारेणेदं नवम्बरमासे ई .वी.1987तमे वर्षे मानितविश्वविद्यालयरूपेण समुद्घोषितम्। इदं च विद्यापीठं भारतीयसंसदअधिनियमेन : श्रीलालबहादुरशास्त्रीराष्ट्रियसंस्कृतविश्वविद्यालयः इति नाम्नाऽनुमोदितं भारतराष्ट्रपतिभिः लब्धस्वीकृति अप्रैलमासस्य त्रिंशत्तमे दिनाङ्के ई .वी.2020 तमे वर्षे केन्द्रीयविश्वविद्यालयरूपेण सुप्रतिष्ठितम् । अयमेव विश्वविद्यालयः ई .वी.2015 तमे वर्षे "नैक" इति संस्थानेन मूल्याङ्कनं विधाय "ए" श्रेण्या प्रत्यायितः। विश्वविद्यालयेऽत्र शास्त्राणां पारम्परिकरीत्याऽऽधुनिकरीत्या च छात्रेभ्यः शिक्षा प्रदीयते। शास्त्री (बी.ए.), आचार्यः (एम.ए.), शिक्षाशास्त्री (बी.एड.), शिक्षाचार्यः (एम.एड.), विद्यावारिधिः (पी.एच.डी) पाठ्यक्रमाः अत्र प्रचाल्यन्ते। अपि च योग-ज्योतिष-पौरोहित्य-वास्तुषु अंशकालिकाः व्यावसायिकपाठ्यक्रमाः नियमितरूपेण अध्याप्यन्ते । अत्र सञ्चालिताः समेऽपि पाठ्यक्रमाः यूजीसी, एनसीटीई इति संस्थानाभ्यां सम्मताः वर्तन्ते।

**तथा**

**तृतीयपक्षः- राष्ट्रियसंस्कृतविश्वविद्यालयः,तिरुपतिः**

आन्ध्रप्रदेशेषुविद्यमाने तिरुपतिः इत्याख्ये विश्वप्रसिद्धक्षेत्रे स्थितं राष्ट्रियसंस्कृतविश्वविद्यालयः भारतसर्वकारेण घटितस्य संस्कृतायोगस्य अनुशंसनानुसारं 1961 तमे वर्षे पारम्परिकसंस्कृतसाहित्यस्य आधुनिकशोधशैल्या प्रचारप्रसारार्थं संस्थापितम्। अप्रैल 1971 तमे वर्षे राष्ट्रियसंस्कृतसंस्थानस्य संरक्षणे एषा संस्था शिक्षामन्त्रालयस्य स्वायत्तसंस्थारूपेण प्रतिष्ठापिता । 1987 तमे वर्षे विश्वविद्यालयानुदानायोगस्य (UGC) अधिनियमानुसारम् (1956) एतत् विद्यापीठं मानितविश्वविद्यालयत्वेन घोषितम् । अत्र प्राक्-शास्त्रितः शास्त्री,



R.K. Bagam
09.05.2022

Central Sanskrit University, Delhi
56-57, Institutional Area, Janakpuri, New Delhi-58
Under MHRD, Govt. of India

09/05/2022

आचार्य, विद्यावारिधिपर्यन्तं शास्त्राणामध्ययनार्थंछात्रावाससहिता व्यवस्था परिकल्पिता वर्तते । शिक्षाशास्त्री, शिक्षाचार्यः,विद्यावारिधिः(शिक्षा) इत्यादीनां व्यावसायिकशिक्षाणां प्रशिक्षणम् आधुनिकशैल्या प्रदीयते ।

विद्यापीठमिदं भारतसर्वकारस्य संसदः अधिनियमेन 2020 तमात् वर्षात् राष्ट्रियसंस्कृतविश्वविद्यालयत्वेन प्रोन्नतम् । अस्य विश्वविद्या8लयस्य पाठ्यक्रमाः सर्वेऽपि UGC, NCTE इत्याभ्यां संस्थाभ्यां द्वारानियमानुसारं विधिवत् प्राप्तमान्यताः सन्ति । 2015 तमे वर्षे अयं विश्वविद्यालयः NAAC द्वारा "ए" श्रेण्या (द्वितीयचक्रे) मूल्याङ्कनेन मान्यता प्राप्तासीत् ।

**अनेन अवबोधपत्रमाध्यमेन**

- परस्परसहयोगेन वैश्विकानुभवाय अवसरप्रदानम्
- संस्कृतसम्बद्धज्ञानस्य प्रगतये आनुकुल्य-समाधानाय च निरन्तरं प्रयत्नः

अवबोधपत्रानुसारम् अधोलिखितानि निबन्धनानि भवन्ति -

**1) उद्देश्यानि**

- ➢ अङ्कीयसंरूपे विद्यमान-संस्कृतसम्बद्ध-शिक्षणाधिगमसामग्रीणां, साहित्यानांतथा संसूचनानां परस्परम् आदानप्रदानं वितरणं च
- ➢ समानाभिरुचिसम्बद्धविषयेषु सयुक्ताश्रये संगोष्ठीनां, सम्मेलनानां, कार्यशालानां च आयोजनम् तथाएतेषु त्रिषुविश्वविद्यालयेषु कार्यरतानाम् अध्यापकानां कर्मचारिणां च कृते भागग्रहणाय आमन्त्रणप्रदानम्
- ➢ यस्मिन् दिनाङ्के तिथौ वा तिस्रः संस्थाः केन्द्रीयविश्वविद्यालयरूपेण परिणताः, संयुक्तरूपेण तद् दिनम् उत्कर्षमहोत्सवरूपेण पालनीयम्। त्रिभिः विश्वविद्यालयैः एतस्य आयोजनं पर्यायरूपेण करिष्यते।
- ➢ अयञ्च उत्कर्षमहोत्सवः प्रतिवर्षम् अप्रैल् मासस्य 30 तमे दिनाङ्के अथवा वैशाखशुक्लसप्तम्यां (गङ्गावतरणदिवसे) तिथौ आचरिष्यते
- ➢ समानाभिरूचिमतीनां संस्थानाम् अभिज्ञानम्, अपि च ताभिः सह परस्परावगाहनस्थापनाय आधिकारिक-परस्परावगाहन- पत्रद्वारा सहकारिता एवं संसूचनानाम् आदानप्रदानम्।
- ➢ विश्वविद्यालयत्रयाणां सहमत्या अन्यशैक्षिककार्यक्रमाणां समायोजनम्
- ➢ संस्कृतशिक्षायां राष्ट्रियशिक्षानीतेः (2020) क्रियान्वयनं
- ➢ अध्यापकानां छात्रणाञ्च परस्परं विनिमयः
- ➢ श्रेयाङ्कानां, छात्र ाणाञ्च स्थानान्तरणम्।

**2) वित्तीयसम्बद्धं दायित्वम्**

एतस्य परस्परावगाहनपत्रस्य अंशरूपेण, विश्वविद्यालयेषु किमपि वित्तीयदायित्वं न भवति। पूर्वोक्त-उद्देश्यानाम् उपलब्धये, विविधकार्यक्रमाणाम् आयोजने यः कोऽपि व्ययो भवतिः सः व्ययः तत्तद्विश्विद्यालयेन वोढव्यः।

अपि च संगोष्ठीनां, सम्मेलनानां तथा कार्यशालानाञ्च आयोजनार्थं यः व्ययःभवति सः आयोजकसंस्थया वोढव्यः



R.K. Ranjan
09.05.2022

Sanskrit University, 56-57, Institutional Area, New Delhi, India * Under MHRD, Govt.

09/05/2022

3) **सांस्थानिकं दायित्वम्**

अस्मिन् परस्परावगाहनपत्रे याभिः संस्थाभिः हस्ताक्षरं कृतं, ताभिः लिखितानुमतिं विना, कस्या अपि संस्थायाः नाम्नः, चिह्नस्य, पदस्य वा उपयोगः, न करणीयः

4) **सहकारः**

प्रत्येकं संस्था एकस्य संयोजकस्य नियोजनं कुर्यात्, यः तस्य विश्वविद्यालयस्य कुलपतेः निर्देशने अस्मिन् परस्परावगाहने पत्रे निर्दिष्टांशानां प्राप्तये कार्यं कुर्यात्।

5) **मध्यस्थनिर्णयः/विवाचनखण्डः/वाक्यांशः**

परस्परावगाहनपत्रान्तर्गतमस्य सहकारस्य कस्यापि अंशे यः कोऽपि विवादः भवेत् सः त्रयाणां विश्वविद्यालयानां कुलपतयः स्वीय-स्वातन्त्र्यं परस्परगौरवं, संयुक्तोत्तरदायित्वं मनसि निधाय, मिलित्वा विवादस्य उपशमनं कुर्युः। तत्र स्वीकृतनिर्णयः एव अन्तिमः।

6) **अवधेः विस्तारः अवसानं च**

एतत्परस्परावगाहनं तस्माद् दिनात् क्रियान्वितं भवति यस्मिन् दिने त्रयाणां विश्वविद्यालयानां कुलसचिवाः अस्मिन् पत्रे हस्ताक्षरं कुर्वन्ति।अस्य अवधिः पञ्चवर्षाणि। एतदवगाहनपत्रोक्त-विषयेषु संशोधनं सर्वैः प्रतिभागिभिः विश्वविद्यालयैः लिखित-सहमत्या आनेतुं शक्यते। सहभागिविश्वविद्यालयानां लिखित-औपचारिक-सहमत्या अस्य अवधेः विस्तारः कर्तुं शक्यः। कोपि विश्वविद्यालयः मासात् पूर्वम् अन्यविश्वविद्यालयेभ्यः लिखित-सूचनां दत्वा अवसादयितुं शक्नोति।

एकवारं अवसादितं चेत्, कोपि विश्वविद्यालयः अन्येन विश्वविद्यालयेन अनुभूयमानायाः वित्तीयक्षतेः अथवा अन्यविधक्षतेः उत्तरदायी न भवति। अथापि ते वित्तीय-प्रतिबद्धतां (यदि कापि स्यात्) परिपूयन्तः कार्यान्वितानां कार्यक्रमाणां सफलतापूर्वकसमाप्तये अनुमन्येरन्।

एतत् परस्परावगाहनपत्रम् 2022तम-वर्षस्य मे मासस्य 8 दिनाङ्के शुभकृन्नामसंवत्सरस्य वैशाखशुक्ल-सप्तमीतिथौ, सर्वैरपि प्रतिभागिभिः साक्षिणां पुरतः सम्मिल्य हस्ताक्षरितम्।

| | | |
|---|---|---|
| केन्द्रीयसंस्कृत-विश्-वविद्यालयः,<br>56-57सांस्थानिकं<br>क्षेत्रम्,जनकपुरी,<br>नवदेहली-110058 | श्रीलालबहादुरशास्त्रीराष्ट्रियसंस्कृत<br>विश्वविद्यालयः,नवदेहली, | राष्ट्रियसंस्कृतविश्वविद्यालयः,<br>तिरूपतिः |



R.K. Raman 09.05.2022

09/05/2022

| (प्रथम-पक्षः ) | ( द्वितीय-पक्षः) | (तृतीय-पक्षः) |
|---|---|---|
| रणजित कुमार बर्मन<br>(आचार्यरणजीतकुमारबर्मन)<br>कुलसचिवः<br>केन्द्रीयसंस्कृतविश्वविद्यालयः,नवदेहली, 56-57,<br>इन्स्टीट्यूशनल<br>एरिया,जनकपुरी,नवदेहली-110058<br><br>साक्षिण:<br><br>हस्ताक्षरम्<br><br>1.<br><br>2. | (डॉ. अल्काराय)<br>कुलसचिवः<br>श्रीलालबहादुरशास्त्रीराष्ट्रियसंस्कृत-विश्वविद्यालयः,नवदेहली<br><br>साक्षिण:<br><br>हस्ताक्षरम्<br><br>1.<br><br>2. | 09/05/2022<br>(कमान्डरचल्लावेकटेश्वर)<br>कुलसचिवः<br>राष्ट्रियसंस्कृतविश्वविद्यालयः, तिरूपतिः<br><br>साक्षिण:<br><br>हस्ताक्षरम्<br><br>1.<br><br>2. |

Central Sanskrit University, Delhi * 56-57, Institutional Area, Janakpuri, New Delhi-58 * Under MHRD, Govt. of India